एव वशिष्ठमाह अहं सशरीरेण स्वर्गं गन्तुं यजेयं वशिष्ठ एतदशक्यमित्याह ततो राजा तस्य पुत्त्रानुवाच सशरीरो यज्ञेन स्वर्गं यथाप्नुयां तथा कुरुत यदि भवद्भिः परित्यक्तस्तदान्यं गुरुमुपासिष्ये वशिष्ठपुत्त्रास्तच्छ्रुत्वा राजानमूचुर्वशिष्ठो भगवान् अशक्यमिति यत् प्राह तदस्माभिः कथं शक्यम् । राजोवाच यद्युमन्यां गतिं गमिष्यामि तच्छ्रुत्वा ऋषिपुत्त्रा राजानं शेपुः चण्डालो भविष्यसि । ततस्तस्यां रात्र्यामतीतायां स चाण्डालदर्शनो भूत्वा विश्वामित्रं शरणमाययौ विश्वामित्रस्तं स्वीयद्रव्येण याजयामास तस्मिन् यज्ञे देवा भागार्थं नागच्छन् ततो विश्वामित्रः क्रोधात् राजानमब्रवीत् मया बाल्यात् प्रभृति यत्तपः कृतं तेन त्वं दिवं व्रज तदा राजा सशरीरो दिवं ययौ । तदा शक्रस्तमुवाच त्रिशङ्को ! त्वं भूमौ पत ततोऽवाक्शिराः पतन् राजा पाहीति विश्वामित्रमुवाच विश्वामित्रस्तिष्ठेति तमुक्त्वा स्वर्गदक्षिणमार्गेऽपरान् सप्तर्षीन् सृष्ट्वापरं नक्षत्रचक्रं स्रष्टुमुपचक्रमे देवाः सम्भ्रान्ता ऋषिमूचुरयं सशरीरः स्वर्गं गन्तुं नार्हति विश्वामित्रस्तानुवाच अहमस्य स्वर्गारोहणं प्रतिज्ञाय कथमनृतं करिष्यामि अतो यावल्लोकाः स्थास्यन्ति तावदमूनि नक्षत्राण्यत्रैव तिष्ठन्तु त्रिशङ्कुरप्यवाक्शिरास्तिष्ठतु । इति रामायणम् ॥ * ॥ विड़ालः । शलभः । इति मेदिनी । के, १०१ ॥ चातकपक्षी । इति शब्दरत्नावली ॥ खद्योतः । इति शब्दमाला ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १०२ ।
"अनेकधाम्नः कापाली त्रिशङ्कुरजितः शिवः ॥")

त्रिशङ्कुजः, पुं, (त्रिशङ्कोर्जायते इति । जन+डः ।) हरिश्चन्द्रराजः । इति हेमचन्द्रः । ३ । ३६५ ॥

त्रिशङ्कुयाजी, [न्] पुं, (त्रिशङ्कुं सूर्य्यवंशीयराजविशेषं याजयतीति । यज+णिच्+णिनिः ।) विश्वामित्रः । इति हेमचन्द्रः । ३ । ५१४ ॥

त्रिशरणः, पुं, (त्रीणि शरणान्यस्येति ।) जिनः । इति त्रिकाण्डशेषः ॥

त्रिशर्करा, स्त्री, (त्रिभिर्गुणिता शर्करा । शाकपार्थिवादित्वात् समासः ।) मिलितगुड़ोत्पन्ना हिमोत्था मधुरा । इति राजनिर्घण्टः ॥

त्रिशला, स्त्री, (तिस्रः शाला यस्याः । पृषोदरादित्वात् साधुः ।) दृत्तार्हन्माटविशेषः । सा वर्द्धमानमाता । इति हेमचन्द्रः । १ । ४१ ॥

त्रिशाखपत्त्रः पुं, (त्रिशाखं त्रिदलं पत्त्रमस्य ।) विल्वः । इति राजनिर्घण्टः ॥

त्रिशिखं, क्ली, (तिस्रः शिखा यस्य ।) त्रिशूलम् । किरीटम् । इति हेमचन्द्रः ॥

त्रिशिखः, पुं, (तिस्रः शिखा अस्य ।) राक्षसविशेषः । स रावणपुत्त्रः । इति हेमचन्द्रः ॥ विल्वः । इति राजनिर्घण्टः ॥ (तामसमन्वन्तरस्य इन्द्रः । यथा, भागवते । ८ । १ । २८ ।
"सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ।
ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥"
शिखात्रययुक्ते, त्रि, । यथा, महाभारते । २ । ४२ । ११ ।
"त्रिशिखां भ्रुकुटीञ्चास्य ददृशुः सर्व्वपार्थिवाः ।
ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव ॥")

त्रिशिखिदला, स्त्री, (तिस्रः शिखाः सन्त्यस्येति इनिः । त्रिशिखि दलं अस्याः ।) मालाकन्दः । इति राजनिर्घण्टः ॥

त्रिशिराः, [स्] पुं, (त्रीणि शिरांसि मस्तकानि यस्येति ।) कुवेरः । इति हेमचन्द्रः ।२।१०३॥ ज्वरः । यथा,—
"त्रिशिरास्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम् ।"
इति श्रीभागवतम् ॥
रावणपुत्त्रविशेषः । (यथा, रामायणे । ६ । १२५ । ६ ।
"अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥")
खरसेनापतिः । इति रामायणम् ॥ (यथा, रघुवंशे । १२ । ४७ ।
"तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ॥"
स्वनामख्यातस्त्वष्टुः प्रजापतेः पुत्त्रः । यथा, महाभारते । ५ । ६ । २ ।
"त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः ।
सपुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत् ॥"
असुरविशेषः । यथा, तत्रैव । ६ । ३१ । १२ ।
"वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो !॥"
शिखात्रयविशिष्टे, त्रि । यथा, तत्रैव । २३ । १४७ । ५४ ।
"त्रिशिरास्तस्य देवस्य शातकुम्भमयो द्रुमः ।
ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः ॥")

त्रिशीर्षकं, क्ली, (त्रीणि शीर्षाणि यस्य । कप् ।) त्रिशूलम् । इति हेमचन्द्रः । ३ । ४५१ ॥

त्रिशूलं, क्ली, (त्रीणि शूलानि इव अग्राणि यस्य ।) अस्त्रविशेषः । तत्पर्य्यायः । त्रिशिखम् २ । इति मेदिनी । खे, ६ ॥ शूलम् ३ त्रिशीर्षकम् ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते ।२।३०।४६।
"चक्राणि परिघाश्चैव त्रिशूलानि परश्वधान् ॥")

त्रिशूली, [न] पुं, (त्रिशूलमस्त्रमस्यस्येति । त्रिशूल+इनिः ।) शिवः । यथा,—
"त्र्यक्षोऽभेदस्त्रिशूली च वृषकेतुर्म्महाबलः ॥"
इति स्कन्दपुराणे नीलकण्ठस्तवः ॥
(त्रिशूलधारिणि, त्रि । स्त्रियां ङीप् । यथा, हरिवंशे । १६४ । ११ ।
"त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम् ॥")

त्रिशृङ्गः, पुं, (त्रीणि शृङ्गाणि यस्य ।) त्रिकूटपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, ब्रह्माण्डे । ३६ । १२ ।
"त्रिशृङ्गो जरुधिश्चैव पर्व्वतावुत्तरौ वरौ ॥")
त्रिकोणः । यथा, कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्तरिति सारसमुच्चयः ॥

त्रिशृङ्गी, [न्] पुं, (त्रीणि शृङ्गाणीव सन्त्यस्येति । त्रिशृङ्ग+इनिः ।) रोहितमत्स्यः । इति शब्दार्थकल्पतरुः ॥

त्रिष्टुप्, [भ्] स्त्री, (त्रिषु स्थानेषु स्तुभ्यते जड़ीक्रियते इति । स्तुभ जड़ीकरणे+क्विप् । षत्वम् ।) छन्दोविशेषः । इति छन्दोमञ्जरी ॥ (यथा, वाजसनेयसंहितायाम् । ६ । ३३ ।
"इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषम् ॥") अस्य विवरणं छन्दस्शब्दे द्रष्टव्यम् । अस्योत्पत्तिविवरणं यथा, श्रीभागवते । ३ । १२ । ४६ ।
"तस्योष्णिगासील्लोमभ्यो गायत्त्री च त्वचो विभोः ।
त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ॥
मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥"

त्रिसन्धिः, स्त्री, (त्रयः सन्धयो विकाशकाला यस्य ।) पुष्पविशेषः । तत्पर्य्यायः । सान्ध्यकुसुमा २ सन्धिवल्ली ३ सदाफला ४ त्रिसन्ध्यकुसुमा ५ कान्ता ६ सुकुमारा ७ सन्धिजा ८ । सा त्रिविधा । रक्ता १ सिता २ असिता च ३ । अस्या गुणाः । कफकासहरत्वम् । रुच्यत्वम् । त्रिदोषशमनत्वञ्च । इति राजनिर्घण्टः ॥

त्रिसन्ध्यं, क्ली, (तिसृणां सन्ध्यानां समाहारः । आबन्तोवेति पाक्षिकी क्लीवता ।) पूर्व्वाह्णमध्याह्नापराह्णकालः । इत्यमरः । १ । ४ । ३ ॥ अस्य रूपान्तरम् । त्रिसन्ध्यी । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ३ । ८२ । २१ ।
"सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन ! ।
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।
गन्धर्व्वाप्सरसश्चैव नित्यं सन्निहिता विभो ! ॥")

त्रिसन्ध्यव्यापिनी, स्त्री, (त्रिसन्ध्यं व्याप्नोतीति । वि+आप्+णिनि+ङीप् ।) त्रिसन्ध्यघटकीभूतयावत्कालव्यापिनी तिथिः । यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति पराशरीयेण त्रिसन्ध्यव्यापित्वेन नियमाभिधानं तदपवादकम् । इति तिथ्यादितत्त्वम् ॥ तयोर्युग्मसंमुख्योरपवादकं तदपवादकम् । इति तट्टीका ॥

त्रिसमं, क्ली, (त्रीणि हरीतकीनागरगुड़ानि समानि यत्र ।) समत्रयम् । समहरीतकीनागरगुड़रूपम् । इति राजनिर्घण्टः ॥

त्रिसरः, पुं, (त्रिभिः सीयते इति । सृ+अप् ।) कृशरः । इति हेमचन्द्रः । ३ । ६२ ॥

त्रिसवनं, क्ली, (त्रयाणां सवनानां कालानां समाहारः ।) त्रिकालम् । इति प्रायश्चित्ततत्त्वम् ॥

त्रिसवनस्नायी, [न] पुं, (त्रिसवने त्रिकाले स्नातीति । स्ना+णिनिः ।) त्रिकालस्नायी । इति स्मृतिः ॥

त्रिसिता, स्त्री, (त्रिगुणिता सिता शर्करा ।) त्रिशर्करा । इति राजनिर्घण्टः ॥

त्रिसीत्यं, क्ली, (त्रिवारं सीतया सम्मितम् । "नौवयोधर्म्मेति ।" ४ । ४ । ६१ । इति यत् ।) वारत्रयकृष्टक्षेत्रम् । इत्यमरः । २ । ६ । ६ ॥